# Shri Bala Ashtottarashatanamastotram 1

# શ્રીબાલાષ્ટોત્તરશતનામસ્તોત્રમ્ ૧

## Document Information

Text title : bAlAtripurasundarI aShTottarashatanAmastotra

File name : bAlA108str.itx

Category : aShTottarashatanAma, devii, dashamahAvidyA, devI

Location : doc_devii

Transliterated by : Satish Arigela

Proofread by : Satish Arigela, PSA Easwaran

Description-comments : bAlAsaparyA

Latest update : June 13, 2015, January 14, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# શ્રીબાલાષ્ટોત્તરશતનામસ્તોત્રમ્ ૧

અગસ્ત્ય ઉવાચ -
હયગ્રીવ દયાસિન્ધો ભગવન્ભક્તવત્સલ ।
બાલાત્રિપુરસુન્દર્યા નામ્નામષ્ટોત્તરં શુભમ્ ।
વદસ્વ મે ત્વં કૃપયા યેન જ્ઞાનં પ્રવર્તતે ॥ ૧॥

હયગ્રીવ ઉવાચ -
શ ૃણુ સમ્યક્પ્રવક્ષ્યામિ શ્રીબાલાષ્ટોત્તરં શતમ્ ।
સર્વવિદ્યાત્મકં જ્ઞેયં શ્રીબાલાપ્રીતિદાયકમ્ ॥ ૨॥

અસ્ય શ્રીબાલાત્રિપુરસુન્દર્યષ્ટોત્તરશતનામસ્તોત્રમહામન્ત્રસ્ય
દક્ષિણામૂર્તિઃ ઋષિઃ । અનુષ્ટુપ્છન્દઃ । શ્રી બાલાત્રિપુરસુન્દરી દેવતા ।
ઐં બીજમ્ । ક્લીં શક્તિઃ । સૌઃ કીલકમ્ ।
શ્રીબાલાત્રિપુરસુન્દરીપ્રસાદસિદ્ધ્યર્થે નામપારાયણે વિનિયોગઃ ।

અથ કરન્યાસઃ -
ૐ ઐં અઙ્ગુષ્ઠાભ્યાં નમઃ । ક્લીં તર્જનીભ્યાં નમઃ ।
સૌઃ મધ્યમાભ્યાં નમઃ । ઐં અનામિકાભ્યાં નમઃ ।
ક્લીં કનિષ્ઠિકાભ્યાં નમઃ । સૌઃ કરતલકરપૃષ્ઠાભ્યાં નમઃ ।

અથ હૃદયાદિન્યાસઃ -
ઐં હૃદયાય નમઃ । ક્લીં શિરસે સ્વાહા । સૌઃ શિખાયૈ વષટ્ ।
ઐં કવચાય હુમ્ । ક્લીં નેત્રત્રયાય વૌષટ્ । સૌઃ અસ્ત્રાય ફટ્ ।
ભૂર્ભુવસ્સુવરોં ઇતિ દિગ્બન્ધઃ ।

ધ્યાનમ્-
પાશાઙ્કુશે પુસ્તકાક્ષસૂત્રે ચ દધતી કરૈઃ ।
રક્તા ત્ર્યક્ષા ચન્દ્રફાલા પાતુ બાલા સુરાર્ચિતા ॥

લમિત્યાદિ પઞ્ચપૂજા -

લં પૃથિવ્યાત્મિકાયૈ ગન્ધં સમર્પયામિ ।
હં આકાશાત્મિકાયૈ પુષ્પાણિ સમર્પયામિ ।
યં વાય્વાત્મિકાયૈ ધૂપમાઘ્રાપયામિ ।
રં અગ્ન્યાત્મિકાયૈ દીપં દર્શયામિ ।
વં અમૃતાત્મિકાયૈ અમૃતોપહારં નિવેદયામિ ।
સં સર્વાત્મિકાયૈ સર્વોપચારપૂજાઃ સમર્પયામિ ॥

અથ શ્રી બાલા અષ્ટોત્તરશતનામસ્તોત્રમ્ ।
ૐ કલ્યાણી ત્રિપુરા બાલા માયા ત્રિપુરસુન્દરી ।
સુન્દરી સૌભાગ્યવતી ક્લીઙ્કારી સર્વમઙ્ગલા ॥ ૧॥

હ્રીઙ્કારી સ્કન્દજનની પરા પઞ્ચદશાક્ષરી ।
ત્રિલોકી મોહનાધીશા સર્વેશી સર્વરૂપિણી ॥ ૨॥

સર્વસંક્ષોભિણી પૂર્ણા નવમુદ્રેશ્વરી શિવા ।
અનઙ્ગકુસુમા ખ્યાતા અનઙ્ગા ભુવનેશ્વરી ॥ ૩॥

જપ્યા સ્તવ્યા શ્રુતિર્નિતા નિત્યક્લિન્નાऽમૃતોદ્ભવા ।
મોહિની પરમાऽऽનન્દા કામેશતરુણા કલા ॥ ૪॥

કલાવતી ભગવતી પદ્મરાગકિરીટિની ।
સૌગન્ધિની સરિદ્વેણી મન્ત્રિણિ મન્ત્રરૂપિણિ ॥ ૫॥

તત્ત્વત્રયી તત્ત્વમયી સિદ્ધા ત્રિપુરવાસિની ।
શ્રીર્મતિશ્ચ મહાદેવી કૌલિની પરદેવતા ॥ ૬॥

કૈવલ્યરેખા વશિની સર્વેશી સર્વમાતૃકા ।
વિષ્ણુસ્વસા દેવમાતા સર્વસમ્પત્પ્રદાયિની ॥ ૭॥

કિઙ્કરી માતા ગીર્વાણી સુરાપાનાનુમોદિની । (સુધાપાનવિનોદિની)
આધારાહિતપત્નીકા સ્વાધિષ્ઠાનસમાશ્રયા ॥ ૮॥

અનાહતાબ્જનિલયા મણિપૂરાસમાશ્રયા ।
આજ્ઞા પદ્માસનાસીના વિશુદ્ધસ્થલસંસ્થિતા ॥ ૯॥

અષ્ટત્રિંશત્કલામૂર્તિ સ્સુષુમ્ના ચારુમધ્યમા ।
યોગેશ્વરી મુનિધ્યેયા પરબ્રહ્મસ્વરૂપિણી ॥ ૧૦॥

ચતુર્ભુજા ચન્દ્રચૂડા પુરાણાગમરૂપિની ।

ઐંકારાદિર્મહાવિદ્યા પઞ્ચપ્રણવરૂપિણી ॥ ૧૧॥

ભૂતેશ્વરી ભૂતમયી પઞ્ચાશદ્વર્ણરૂપિણી ।
ષોઢાન્યાસ મહાભૂષા કામાક્ષી દશમાતૃકા ॥ ૧૨॥

આધારશક્તિઃ તરુણી લક્ષ્મીઃ ત્રિપુરભૈરવી ।
શામ્ભવી સચ્ચિદાનન્દા સચ્ચિદાનન્દરૂપિણી ॥ ૧૩॥

માઙ્ગલ્ય દાયિની માન્યા સર્વમઙ્ગલકારિણી ।
યોગલક્ષ્મીઃ ભોગલક્ષ્મીઃ રાજ્યલક્ષ્મીઃ ત્રિકોણગા ॥ ૧૪॥

સર્વસૌભાગ્યસમ્પન્ના સર્વસમ્પત્તિદાયિની ।
નવકોણપુરાવાસા બિન્દુત્રયસમન્વિતા ॥ ૧૫॥

નામ્નામષ્ટોત્તરશતં પઠેન્ન્યાસસમન્વિતમ્ ।
સર્વસિદ્ધિમવાપ્નોતી સાધકોભીષ્ટમાપ્નુયાત્ ॥ ૧૬॥

ઇતિ શ્રી રુદ્રયામલતન્ત્રે ઉમામહેશ્વરસંવાદે
શ્રી બાલા અષ્ટોત્તરશતનામસ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded and proofread by Satish Arigela
Corrected by PSA Easwaran psaeaswaran at gmail
See corresponding nAmAvalI to help prayers.
There are different versions of stotram found
in the specified links.

---

*Shri Bala Ashtottarashatanamastotram 1*
pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*